# Mahābhārata 1.3.1-9

Texte en français.

जनमेजयः पारिक्षितः सह भ्रातृभिः कुरुक्षेत्रे दीर्घसत्रमुपास्ते। तस्य भ्रातरस्त्रयः श्रुतसेन उग्रसेनो भीमसेन इति। तेषु तत्सत्रमुपासीनेषु तत्र श्वाभ्यागच्छत्सारमेयः। स जनमेजयस्य भ्रातृभिरभिहितो रोरूयमाणो मातुः समीपमुपागच्छत्। तं माता रोरूयमाणमुवाच। किं रोदिषि। केनास्यभिहित इति। स एवमुक्तो मातरं प्रत्युवाच। जनमेजयस्य भ्रातृभिरभिहितोऽस्मीति। तं माता प्रत्युवाच। व्यक्तं त्वया तत्रापराद्धं येनास्यभिहित इति। स तां पुनरुवाच। नापराध्यामि किंचित्। नावेक्षे हवींषि नावलिहे इति। तच्छ्रुत्वा तस्य माता सरमा पुत्रशोकार्ता तत्सत्रमुपागच्छद्यत्र स जनमेजयः सह भ्रातृभिर्दीर्घसत्रमुपास्ते। स तया क्रुद्धया तत्रोक्तः। अयं मे पुत्रो न किंचिदपराध्यति। किमर्थमभिहित इति। यस्माच्चायमभिहितोऽनपकारी तस्माददृष्टं त्वां भयमागमिष्यतीति। स जनमेजय एवमुक्तो देवशुन्या सरमया दृढं संभ्रान्तो विषण्णश्चासीत्।

Texte en français.